**झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची**

**कक्षा- अष्टमी　　वार्षिकी परीक्षा 2024-25　　विषयः- संस्कृतम्**

**समयः-60 निमेषाः　आदर्शप्रश्नपत्रं संस्कृतम्　　पूर्णांकाः - 50**

**(बहुविकल्पीयाः प्रश्नाः)**

सामान्यनिर्देशाः-

- अस्मिन् प्रश्नपत्रे पञ्चाशत् (50) प्रश्नाः। (इस प्रश्न-पत्र में 50 प्रश्न हैं।)
- सर्वे प्रश्नाः अनिवार्याः। (सभी प्रश्न अनिवार्य हैं।)
- प्रत्येक-प्रश्नार्थं एकोऽङ्को निर्धारितः। (प्रत्येक प्रश्न के लिए एक अंक निर्धारित है।)
- प्रत्येक-प्रश्नस्य चत्वारो विकल्पाः। उचितविकल्पं चिनुत। (प्रत्येक प्रश्न के चार विकल्प दिए गए हैं। उचित विकल्प का चयन करें।)
- अनुचितोत्तरार्थं कोऽपि नकारात्मकाङ्को नास्ति। (गलत उत्तर के लिए कोई नकारात्मक अंक नहीं है।)

**(अपठित-अवबोधनम्)**

**निर्देशः अधोलिखितं अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-**

संस्कृतं भारतस्य गौरवमयी भाषा अस्ति। इयं मानवमात्रस्य कल्याणं करोति। विश्वबन्धुत्वं च प्रसारयति। अस्याः साहित्यं विशालं वर्तते। संस्कृतमधीत्य जनाः गौरवमनुभवन्ति। संस्कृतदिवसः रक्षाबन्धनदिवसे मानितो भवति। संस्कृतभाषायाः अध्ययनेन सर्वैः भारतस्य संस्कृतिः रक्षणीया।

झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची
नवोन्मेष शोध नेतृत्व
JCERT

1.संस्कृतदिवसः कदा मानितो भवति ?

क.स्वतन्त्रतादिवसे　ख.रक्षाबन्धनदिवसे　ग.गणतन्त्रदिवसे　घ.विशेषदिवसे

2.संस्कृतसाहित्यं कीदृशं वर्तते ?

क.अयम्　ख.मधुरम्　ग.विशालम्　घ.इदम्

3.अस्माभिः का रक्षणीया ?

क.मतिः　ख.गतिः　ग.कति　घ.संस्कृतिः

4. संस्कृतम् अधीत्य जनाः किम् अनुभवन्ति?

क.गौरवम्　ख.महापुरुषम्　ग.बालकम्　घ.धनम्

5.'इयम्' इत्यस्मिन् पदे कः मूलसर्वनामः?

क.अस्मद्　ख.युष्मद्　ग.इदम्　घ.सर्व

**निर्देशः अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-**

भारतीय-पुनर्जागरणस्य अग्रदूतेषु स्वामिविवेकानन्दः श्रेष्ठतमः। युगपुरुषस्य स्वामिविवेकानन्दस्य जन्म १२ जनवरी १८६३ तमे ख्रिष्टाब्दे कलकत्तानगरे अभवत्। बाल्यकाले तस्य नाम नरेन्द्रनाथः आसीत्। सः बाल्यकालात् एव अत्यन्तमेधावी आसीत्। पञ्चविंशतिवर्षस्य वयसि रामकृष्णपरमहंसेन सह तस्य मेलनम् अभवत्। सः परमहंसम् अपृच्छत्-किं भवान् ईश्वरम् अपश्यत्? परमहंसः अवदत्-अहं यथा त्वां पश्यामि तथैव ईश्वरम् अपि पश्यामि। ततः परमहंसः विवेकानन्दं स्पृष्टवान्। तस्य स्पर्शेण विवेकानन्दः अलौकिकम् आनन्दं प्राप्नोत्। सः परमहंसस्य शिष्यः अभवत्।

6.विवेकानन्दस्य बाल्यकालस्य नाम किम्?

क.महेन्द्रनाथ:    ख.सुरेन्द्रनाथ:    ग.नरेन्द्रनाथ:    घ.लोकनाथ:

7.विवेकानन्दस्य जन्म कुत्र अभवत्?

क.कलकत्तानगरे   ख.राँचीनगरे   ग.मद्रासनगरे   घ.पाटलिपुत्रनगरे

8.विवेकानन्दस्य जन्म कदा अभवत्?

क.२१ जनवरी १८६३    ख.१२ जनवरी १८६३

ग.२२ जनवरी १८६३    घ.०२ जनवरी १८६३

9.विवेकानन्दस्य केन सह मेलनम् अभवत्?

क.जनकेन   ख.रामकृष्णपरमहंसेन   ग.रामेण   घ.मोहनेन

10.'स: बाल्यकालात् एव अत्यन्तमेधावी आसीत्।'अस्मिन् वाक्ये अव्ययपदं किम्?

क.बाल्यकालात्   ख.एव   ग.अत्यन्तमेधावी   घ.आसीत्

**निर्देश: अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्य: चित्वा लिखत-**

**अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ।**

**अधनस्य कुतो मित्रम् अमित्रस्य कुत: सुखम् ॥**

11.कस्य सुखं नास्ति?

क.मित्रस्य   ख.अमित्रस्य   ग.यस्य   घ.तस्य

12.कस्य विद्या नास्ति?

क.अलसस्य   ख.अधनस्य   ग.अविद्यस्य   घ.अमित्रस्य

13.कस्य धनं नास्ति?

क.विद्यस्य   ख.अविद्यस्य   ग.जनकस्य   घ.बालस्य

14.'मित्रस्य' इत्यस्य पदस्य विपर्ययपदं किम्?

क.अलसस्य   ख.अविद्यस्य   ग.अधनस्य   घ.अमित्रस्य

15.'अधनस्य' इत्यस्मिन् पदे का विभक्ति: प्रयुक्ता?

क.तृतीया   ख.चतुर्थी   ग.पञ्चमी   घ.षष्ठी

**निर्देश:- अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्य: चित्वा लिखत-**

**पन्ना**-हे प्रभो! (चिन्तां प्रकटयति) कोऽपि उपायं न दृश्यते। मम पुत्र्याः स्मृत्याः विवाहः कथं भविष्यति ?

**रामवृक्ष:**-चिन्तां मा कुरु। मम संज्ञाने एकः सुयोग्यः वरः अस्ति। सः झारखण्डसर्वकारे प्रखण्डविकासपदाधिकारीपदे कार्यरतः अस्ति ।तस्य

नाम आदर्शः अस्ति।

**पन्ना**-(साश्चर्येण) किं सः मम पुत्र्या सह विवाहं करिष्यति?

**रामवृक्षः**-आम् अहं जानामि सः व्यवहारकुशलः आधुनिकविचारयुक्तः च अस्ति।

यथा नाम तथा कर्म। (उभौ लोहरदगाजिलान्तर्गते मर्राडीहग्रामे आदर्शस्य

पितुः धनेश्वरस्य पार्श्वे गच्छतः)

**रामवृक्षः**-नमस्कार महोदय !

**धनेश्वरः**-नमस्कारः अन्तः आगच्छताम्।

**रामवृक्षः**-इयं मम भगिनी। एषा मध्यविद्यालये आदेशपालपदे सेवारता अस्ति।

अस्याः पुत्री स्मृतिः गतवर्षे प्रथमश्रेण्यां स्नातकोत्तीर्णा जाता।

अहमिच्छामि यत् भवतः पुत्रेण आदर्शेण सह तस्या विवाहःभवेत्।

16.स्मृत्याः मातुः नाम किम्?

क.चन्ना ख.छन्ना ग.पन्ना घ.मन्ना

17.प्रखण्डविकासपदाधिकारीपदे कः आसीत्?

क.रामवृक्षः ख.धनेश्वरः ग.आदर्शः घ.स्मृतिः

18.पन्ना कुत्र सेवारता आसीत्?

क.मध्यविद्यालये ख.उच्चविद्यालये ग.कार्यालये घ.विश्वविद्यालये

19. धनेश्वरः कुत्र निवसति?

क.पचम्बाग्रामे ख.मर्राडीहग्रामे ग.टुण्डीग्रामे घ.चटकग्रामे

20.'मध्यविद्यालये' इत्यस्मिन् पदे का विभक्तिः?

क.षष्ठी ख.सप्तमी ग.तृतीया घ.प्रथमा

**निर्देशः - प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत-**

21.शान्तितुल्यं किं नास्ति?

क.तपः ख.नरः ग.व्याधिः घ.सुजनः

22.का सर्वदा गतिशीला अस्ति?

क.पादपः ख.नदी ग.नामाभिः घ.कश्चिद्

23. नरः किं हित्वा प्रियो भवति?

क.मानम् ख.क्रोधम् ग.कामम् घ.लोभम्

24.हस्ते कति अङ्गुल्यः सन्ति?

क.पञ्च ख.सप्त ग.अष्ट घ.नव

25 अनुद्वेगकरं --------सत्यं प्रियहितं च यत्।स्वाध्यायाभ्यसनं चैव वाङ्मयं तप

उच्यते ।। (रिक्त- स्थानं पूरयत)

क.वाक्यं　　　ख.अहं　　　ग.तव　　　घ.त्वम्

26. 'पाणि:'पदस्य पर्यायपदं किम्?

क.सज्जने　　　ख.हस्त:　　　ग.दिवसस्य　　　घ.विचारितम्

27. प्राचीनकाले कासां स्थिति: उत्तमा आसीत्?

क.पशूनाम्　　　ख.नारीणाम्　　　ग.शिशूनाम　　　घ.दानवानाम्

**निर्देश:-रेखाङ्कितपदेषु प्रश्ननिर्माणं कुरुत-**

28. दोलनक्रमे ते <u>पुष्पाणि</u> वर्षयन्ति ।

क.कम्　　　ख.कानि　　　ग.क:　　　घ.कया

29.<u>सावरकरस्य</u> जीवनचरितं पठनीयम्।

क. क:　　　ख.केन　　　ग.कया　　　घ.कस्य

30.वटुरूपधारी <u>शिव:</u> अस्ति।

क.कस्मात्　　　ख.कस्या:　　　ग.क:　　　घ.किम्

**(व्याकरणम्)**

**निर्देश: - प्रदत्तविकल्पेभ्य: समुचितम् उत्तरं चित्वा लिखत-**

31.'पुस्तक+आलय:' सन्धि: भवति-

क.पूसतकालय:　　　ख.पुस्तकालय:　　　ग.पुसतकालय:　　　घ.पुस्ताकलाय:

32.'सत्येन्द्र:' इत्यस्य पदस्य सन्धिविच्छेद: भवति-

क.सत्य+इन्द्र:　　　ख.सतय +इन्द्र:　　　ग.सय+इन्द्र:　　　घ.सत्य+ईन्द्र:

33.'यदि+अपि' सन्धि: भवति-

क.यद्यपि　　　ख.यद्यपी　　　ग.यदैपि　　　घ. यदुपि

34.'गन्तुम्' प्रकृति-प्रत्यय: पृथक् करणीय:-

क.गम+तुमुन्　　　ख. गम्+तुमुन्　　　ग. गम्+ तुमुन　　　घ.गाम्+तुमुन्

35.'प्र+नम्+ल्यप्' रूपं भवति-

क.प्रनम्य　　　ख.प्रणम्य　　　ग.प्रणमय　　　घ.प्रनमय

36.'जलप्रदूषणं न करणीयम्।' अस्मिन् वाक्ये अव्ययपदं किम्?

क.जल　　　ख.प्रदूषणं　　　ग.न　　　घ.करणीयम्

37.--------(1) व्याध: तत्र आगतवान्। रिक्तस्थानाय उचितं विकल्पं चिनुत-

क.एक　　　ख.एक:　　　ग.एका　　　घ.एकम्

38.गृहे-------(3) फलानि सन्ति। रिक्तस्थानाय उचितं विकल्पं चिनुत-

अनुसंधान एवं प्रशिक्षण परिषद्, राँची
नवोन्मेष शोध नेतृत्व
JCERT

क.त्रीणि    ख.त्राणी    ग.त्रीण    घ.त्रय:

39.'अनुगच्छति' पदे उपसर्गं पृथक् कुरुत-

क.अ    ख.अन    ग.अनु    घ.अनू

40.'प्र+वहति 'उपसर्गं योजयत-

क.पवहति    ख.प्रवहति    ग.प्रावहति    घ.प्रवहती

41. भिन्नपदं चिनुत-

क.पत्रम्    ख.फलम्    ग.पुष्पम्    घ.मित्रम्

42.'गङ्गा 'इत्यस्य पदस्य पर्यायवाची कः?

क. भागीरथी    ख.यमुना    ग.कावेरी    घ. नभः

43. 'माता 'इत्यस्य पदस्य विलोम-पदं किम्?

क.भ्राता    ख.भगिनी    ग. पिता    घ.पत्नी

44. "मम जलं प्रदूषितं कुर्वन्ति" अत्र क्रिया-पदं किम् अस्ति?

क.मम    ख.जलं    ग.प्रदूषितं    घ.कुर्वन्ति

45. 'युष्मद्'शब्दस्य प्रथमा विभक्तौ एक-वचने रूपं भवति-

क.त्वम्    ख.युवाम्    ग.यूयम्    घ.अहम्

46.' लता 'शब्दस्य द्वितीया- विभक्तौ एक-वचने रूपं भवति-

क.लताम्    ख.लता    ग.लता:    घ.लतया

47. 'राजन् 'शब्दस्य प्रथमा विभक्तौ एक-वचने रूपं भवति-

क.राजा    ख.राजभिः    ग.राजभ्यः    घ.राजसु

48. 'पठति' इत्यस्मिन् पदे कः लकारः अस्ति?

क.लट्    ख.लोट्    ग.लृट्    घ.विधिलिङ्

49. 'गम् ' धातोः लट्-लकारे मध्यम-पुरुषे बहुवचने रूपं भवति -

क.गच्छथ    ख.गच्छन्ति    ग.गच्छामि    घ. गच्छति

50. 'क्रीड् ' धातोः लङ्लकारे प्रथमपुरुषे बहुवचने रूपं भवति-

क.अक्रीडत्    ख.अक्रीडताम्    ग.अक्रीडन्    घ.अक्रीडः

अनुसंधान एवं प्रशिक्षण परिषद्, राँची
नवोन्मेष शोध नेतृत्व
JCERT

SANSKRIT MODEL SET

CLASS-8 2024-25

ANSWER KEY

| | | | | |
|---|---|---|---|---|
| 1. ख.रक्षाबन्धनदिवसे | 11. ख.अमित्रस्य | 21. तप: | 31. ख.पुस्तकालय: | 41. घ.मित्रम् |
| 2. ग.विशालम् | 12. क.अलसस्य | 22. ख.नदी | 32. क.सत्य+इन्द्र: | 42. भागीरथी |
| 3. घ.संस्कृति: | 13. ख.अविद्यस्य | 23. क.मानम् | 33. क.यद्यपि | 43. ग. पिता |
| 4. क.गौरवम् | 14. घ.अमित्रस्य | 24. क.पञ्च | 34. ख. गम्+तुमुन् | 44. घ.कुर्वन्ति |
| 5. ग.इदम् | 15. घ.षष्ठी | 25. क.वाक्य | 35. ख.प्रणम्य | 45. क.त्वम् |
| 6. ग.नरेन्द्रनाथ: | 16. ग.पन्ना | 26. ख.हस्त: | 36. ग.न | 46. क.लताम् |
| 7. क.कलकत्तानगरे | 17. ग.आदर्शः | 27. ख.नारीणाम् | 37. ख.एक: | 47. क.राजा |
| 8. ख.१२ जनवरी १८६३ | 18. क.मध्यविद्यालये | 28. ख.कानि | 38. क.त्रीणि | 48. क.लट् |
| 9. ख.रामकृष्णपरमहंसेन | 19. ख.मरोडीहग्रामे | 29. घ.कस्य | 39. ग.अनु | 49. क.गच्छथ |
| 10. ख.एव | 20. ख.सप्तमी | 30. ग.क: | 40. ख.प्रवहति | 50. ग.अक्रीडन् |

शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची
नवोन्मेष शोध नेतृत्व
JCERT